१०सू०। "पश्चादर्धपुरुषे च" ११सू०। "उन्मुच्य पूर्वार्द्धात् पश्चार्धे प्रतिमुच्य दक्षिणायस्य मध्यमे शङ्कुः" १२सू०। "अभितोऽर्धपुरुषयोश्च" १३सू०। "एवमुत्तरोऽन्तः" १४सू०। "दक्षिणे पार्श्वे पूर्ववदायस्य पञ्चमभागीये शङ्कुः"१५सू०। "तस्मिन् पाशं प्रतिमुच्य पूर्वे चार्धपुरुषीये पञ्चमभागीयार्धपुरुषीययोः सन्निपात्य तस्मिञ्छङ्कुः" १६सू०। "एवं पश्चात्"१७सू०। "एवमुत्तरः पक्षः" १८सू०। "तथा पुच्छं वितस्त्या" १९सू०। "इच्छन् पक्षपुच्छाप्ययेषु चतुरङ्गुलंचतुरङ्गुलं संकर्षति विकर्षत्यन्ते"२०सू०। "यत्र पक्ष आत्मानमप्येति स पक्षाप्ययः एवं पुच्छाप्ययः। अप्ययेषु पक्षयोः पुच्छस्य च आत्मसम्बन्धिसमीपे चतुरङ्गुलं चत्वारि-चत्वार्यङ्गुलान्युभयोः पार्श्वयोः सङ्कर्षति सङ्कोचयति, तथा अन्ते पक्षपुच्छप्रान्ते उभयोः पार्श्वयोः चतुरङ्गुलं विकर्षति विस्तारयति" संग्र०। "पञ्चारत्निः-पुरुषो दशपदो द्वादशाङ्गुलं पदं प्रक्रमस्त्रिपदः समविभक्तस्य" २१सू०। "पञ्चारत्नयः यस्य सः पञ्चभिररत्निभिः पुरुषः दशभिः पदैः पुरुषो द्वादशभिरङ्गुलैः पदम् इत्येवमर्थो न भवति इतः प्रागरत्न्यादीनां लक्षणस्यानुक्तत्वेनासिद्धत्वात्, अतश्चैवम् पुरुषस्य समविभक्तस्य यः पञ्चमो भागः सोऽरत्निः तस्य दशमो भागः पदम्, पदस्य द्वादशो भागोऽङ्गुलम् त्रिभिः पदैरेकः प्रक्रमः इति तु भवति पदस्य सिद्धत्वात्" क०। "परितत्य रज्ज्वा सहितं बहीरज्ज्वेकषष्टे शते परिश्रितो मिनोति" २२ सू०। "रज्ज्वा परितत्य सर्व्वतोवेष्टयित्वा रज्ज्वाबहिर्भागे सहितं रज्जुसंलग्नं यथा भवति तथा एकषष्ट्यधिके द्वे शते परिमिनोति" "क० "चतुर्णवतानि वा त्रीणि" २३सू०। चतुर्नवत्यधिकानि त्रीणि शतानि" क०। "ऊर्ध्वाः शर्कराः खाते" २४सू०। "उत्तरेषु पुरुषीयेणैकशतविधात्" २५सू०। "उत्तरेषु अष्टविधादिषु चयनेषु आ एकशतविधात् एकशतविधचयनं यावत् एकाधिकशतपुरुषात्मकपञ्चनवतितमचयनपर्य्यन्तम् पुरुषीयेण एकैकपुरुषवृद्ध्या अग्निमानं भवति तस्माद् सप्तविधमेव प्रथमं विदधीतेति" (१०,२,३,१८) क० "यथाग्निवेदीष्टकाप्रमाणम्"२६सू०। वेदिश्च इष्टकाश्च वेदीष्टकाः तासां प्रमाणं वेदीष्टकाप्रमाणम् तद्यथाग्नि भवति, अग्निमानमनतिक्रम्य यथाग्नि, यथाग्निक्षेत्रस्य प्रमाणं वर्द्धते तथा वेदिप्रमाणं वर्धते इष्टकाप्रमाणं च वर्द्धते, न हि वेदिवृद्धिं विना तन्मध्ये वर्धितस्याग्नेर्मानं सम्भवति, नापि इष्टका न वर्धिता वर्धितमग्निक्षेत्रं पूरयितुं शक्नुवन्ति, अतो युक्तमुभयोर्वृद्धिः"क०। "अन्तःपात्यगार्हपत्ययोरिच्छन्" २७सू०। "पूर्वार्धाद्यामस्य त्रीन् प्राचः स वेद्यन्तः प्रक्रमः प्रक्रमति" (१०,२,३,१) यः प्रक्रमत्रयपरिमितो देशः सोऽन्तःपात्य उच्यते, तस्यान्तःपात्यस्य गार्हपत्यस्य गार्हपत्यचितेश्च इच्छन् इच्छया वृद्धिं कुर्य्यात् इच्छया न कुर्य्यात् तद्धैकउत्तरा" श्रुतेः (१०,२,३,६) क०। "उत्तरपक्षस्यापरस्यां स्रक्त्यां परिश्रितो मिनोति जङ्घामात्रीं नाभिमात्रीं मुखमात्रीमिति" २८ सू०। "अग्नेरुत्तरपक्षस्यापरस्रक्त्यां पश्चिमकोणे एवम्प्रमाणास्तिस्रः परिश्रितो मिनोति" क०। अत्र सर्व्वत्र चतुरङ्कैः शतपथब्राह्मणाध्यायादि बोध्यम्। त्रिभिः कातीयश्रौतसूत्राध्यायादि द्वाभ्यां शुक्लयजुर्वेदाध्यायादि तेन तत्तत्स्थाने अत्रोक्तप्रतीकयुक्तमन्त्रमूलवाक्यादिकं दृश्यमिति सङ्केतज्ञापनम्। विस्तरस्तु शतपथब्राह्मणे लिखिताङ्क सूचिताध्यायादौ दृश्यः।

**इष्टकापथ** न० इष्टकायामपि पन्था यस्य अच् समा०। इष्टकापथं यस्याधोमुखवायुकरणात्। १वीरणमूले। इष्टकया निर्मितः पन्था अच् समा०। इष्टकानिर्मिते २पथि पु०।

**इष्टकाव** त्रि० इष्टका अस्त्यर्थे व। इष्टकायुक्ते।

**इष्टकावत्** त्रि० इष्टका+चतुरर्थ्यां मध्वादि० मतुप् मस्य वः। इष्टकासन्निकृष्टदेशादौ स्त्रियां ङीप्।

**इष्टगन्ध** पु० कर्मधा०। १सुगन्धौ। इष्टोगन्धोऽस्य। २सुगन्धिद्रव्ये त्रि० ३वालुकायां न० मेदि०।

**इष्टतम** त्रि०अतिशयेन इष्ट+तमप्। १प्रियतमे २अतिशयाभीष्टे "यद्दयदिष्टतमं लोके"गीता। द्वयोर्मध्ये अतिशयेन इष्टः तरप्। इष्टतरः द्वयोर्मध्ये अतिशयेन इष्टे त्रि०।

**इष्टदेव** पु० इज्यते यज-कर्मणि क्त कर्मधा०। १पूज्ये देवे तन्त्राद्युक्तविधानेन यस्य मन्त्र उपास्यतया गृहीतस्तस्मिन् २देवे च। इष्टदेवताद्ययोप्यत्र स्त्री।

**इष्टनि** त्रि० यज—तनिक् संप्र० इष-तनिक् वा। १यष्टव्ये २एष्टव्ये च। "तुविष्वणिरप्नस्वतीषूर्वरास्विष्टनिरार्त्तना स्विष्टनिः" ऋ० १,१२७,६। "इष्टनिरेष्टव्योयष्टयो वा"भा०। [व्याकरणोक्तसंस्कारानुसारेण प्रयोगे।

**इष्टप्रयोग** पु० इष्टस्य शिष्टप्रयुक्ततया निश्चितस्य प्रयोगः।

**इष्टवत्** न०यज—इष वा क्तवतु स्त्रियां ङीप्। १यजनकर्त्तरि २इच्छायुक्ते च। "इष्टं वेदाध्ययनादिः साध्यतयाऽस्त्यस्य मतुप् मस्य वः। ३इष्टकर्म्म कर्त्तरि। वेदे तु पूर्व्वपददीर्घः इष्टावान् "इष्टावन्तोरातिषाचोदधानाः" अथ० १८,३,